# संस्कृत वार्ता:

दिनाङ्क :- 12.07.2026 प्रात: - 06:55

<u>अथ वार्ताः</u>

<u>प्रधानमन्त्रिणः न्यूजीलैण्डदेशयात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी न्यूजीलैण्डदेशस्य स्वीयां ऐतिहासिकीं द्विदिवसीययात्रां सम्पन्नं कृत्वा भारतं प्रति प्रस्थितवान्। विगतचत्वारिंशद्वर्षेभ्यः अनन्तरम् एषा कस्यापि भारतीयप्रधानमन्त्रिणः प्रथमा न्यूजीलैण्डयात्रा आसीत्, या उभयदेशयोः द्विपक्षीयसम्बन्धान् नूतनां गतिम् अददात्।

यात्रासमये प्रधानमन्त्री मोदी न्यूजीलैण्डदेशस्य प्रधानमन्त्रिणा क्रिस्टोफर-लक्सन् इत्यनेन सह द्विपक्षीयवार्ताम् अकरोत्। उभौ नेतारौ रक्षापर्यटन-क्रीडापद्प्रबन्धन-दुग्धव्यवसाय-पशुपालनादिषु क्षेत्रेषु पञ्च-ज्ञापनपत्राणाम् आदानप्रदानं कृतवन्तौ।

अस्याः यात्रायाः प्रमुखाकर्षणेषु अन्यतमः कार्यक्रमः ऑकलैण्डनगरस्य स्पार्क्-अरीना इत्यत्र आयोजितः प्रवासिभारतीय-समुदायस्य समागमः आसीत्, यस्मिन् दशसहस्राधिकाः प्रवासिभारतीयाः समुपस्थिताः आसन्। समागमं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् भारत-न्यूजीलैण्डदेशयोः भविष्यं परस्परं सम्बद्धम् अस्ति।

प्रधानमन्त्री मोदी सस्नेहस्वागताय न्यूजीलैण्डदेशस्य प्रधानमन्त्रिणं क्रिस्टोफर-लक्सन् इत्येतं प्रति कृतज्ञतां प्रकटितवान्।

----------------------------------------

<u>आईएनएस-महेन्द्रगिरिः</u>

रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् भारतं पारम्परिक-रक्षासामर्थ्यस्य उन्नतप्रौद्योगिकीनां च सुदृढीकरणेन दृढम्, आत्मनिर्भरं, भविष्यस्य आह्वानेभ्यश्च अनुकूलं रक्षाबलं निर्माति।

असौ एतद् विशाखापत्तनम-नगरे भारतीयनौसेनायाः पूर्वीनौसेनादले प्रोजेक्ट्-17ए इत्येतस्य अन्तर्गते स्वदेशे निर्मितस्य षष्ठयुद्धपोतस्य आईएनएस-महेन्द्रगिरिः इत्येतस्य समावेशनसमारोहं सम्बोधयन् अवदत्।

रक्षामन्त्री अवदत् यत् आईएनएस-महेन्द्रगिरिः इत्येतस्य नौसेनायां सम्मेलनं भारतस्य सामुद्रिकसामर्थ्यस्य स्वदेशिरक्षा-क्षमतायाश्च सुदृढीकरणदिशि अन्यत् महत्त्वपूर्णं सोपानम् अस्ति।

-----------------------------------------

## पश्चिमबङ्गाले समाननागरिक-संहितासमितिः

पश्चिमबङ्गाल-प्रशासनेन राज्याय यू-सी-सी इति समान-नागरिक-संहितायाः प्रारूपविधेयकस्य परीक्षार्थं नवसदस्यात्मिका समितिः निर्मिता।

अस्मिन् विषये अधिसूचना पूर्वमेव प्रकाशिता अस्ति। सेवानिवृत्त-न्यायमूर्तिः रञ्जना-प्रकाश-देसाई समितेः अध्यक्षत्वेन नियुक्ता। मेघालयस्य पूर्वराज्यपालः तथागत-रॉयः अपि समितेः सदस्येषु अन्यतमः अस्ति।

-----------------------------------------

## भारतीयखाद्य-सुरक्षामानकप्राधिकरणम्

भारतीयखाद्यसुरक्षामानकप्राधिकरणेन खाद्यसुरक्षामानकाधिनियमस्य द्विसहस्रषड् इत्यस्य उल्लङ्घनसम्बद्धानां बहूनाम् उपभोक्तृपरिवादानाम् अनन्तरं स्विग्गी-इन्स्टामार्ट् इत्यस्मै नव अधिसूचनाः प्रेषिताः।

प्राधिकरणेन सामाजिक-सञ्चारपटले प्रकाशिते सन्देशे उक्तं यत् सम्बन्धितः खाद्यव्यवसायसञ्चालकः विस्तृतं स्पष्टीकरणं अनुपालन-प्रतिवेदनं च समर्पयितुं निर्देशितः अस्ति।

-----------------------------------------

## फीफा विश्वचषक प्रतिस्पर्धा

फीफा-विश्वचषक-प्रतिस्पर्धायाम् अद्य प्रातः फ्लोरिडा इत्यत्र मियामी-क्रीडाप्राङ्गणे इङ्ग्लैण्डदेशेन नॉर्वे-देशं द्वि-एकम् इत्यङ्कान्तरालेन पराजित्य उपान्त्यचक्रे प्रविष्टम्।

अनेन विजयेन इङ्ग्लैण्डदेशेन निरन्तरं तृतीयवारं जूल्स्-रिमे-ट्रॉफी इति विश्वचषक-प्रतिस्पर्धायाः उपान्त्यचक्रे प्रविष्टम्। वर्षे नवत्यधिक-नवदश-शततमे वर्षे पश्चिमजर्मनीदेशात् तथा अष्टादशाधिक-द्विसहस्रतमे वर्षे क्रोएशियादेशात् पराजयानन्तरम् इदानीम् इङ्ग्लैण्डदलम् विजयस्य आशां बिभर्ति।

-----------------------------------------

## <u>वियतनाम-नौकादुर्घटना</u>

वियतनामदेशस्य प्रधानमन्त्री ले-मिन्ह-हुन् इत्येषः फू-क्वोक-द्वीपस्य समीपे जाता स्पीडबोट् इत्येतस्याः दुर्घटनायाः अन्वेषणाय आदेशं प्रदत्तवान्। अस्यां दुर्घटनायां पञ्चदश भारतीयपर्यटकाः निधनमुपगताः।

मुम्बईस्थितेन वियतनामदेशस्य महावाणिज्य-दूतावासेन प्रकाशितस्य वक्तव्यस्य अनुसारं प्रधानमन्त्री ले-मिन्ह-हुन् सम्बन्धिताधिकारिणः दुर्घटनायाः प्रत्यक्षाप्रत्यक्षकारणानां परीक्षणं कर्तुं तथा भविष्ये एतादृशानां घटनानां पुनरावृत्तिं निवारयितुं आवश्यक-परिष्कारात्मक-पदक्षेपानि स्वीकर्तुम् आदिष्टवान्।

।। <u>इति वार्ता:</u>।।